# Ribhuproktam Sarvamasadevatvanirupanam

# ઋભુપ્રોક્તં સર્વમસદેવત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sarvamasadevatvanirupanam

File name : RRibhuproktaMsarvamasadevatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 14 | 28(2)-54||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વમસદેવત્વનિરૂપણમ્

(અસદેવ હિ સર્વમ્)
અસદેવ જગત્સર્વં અસદેવ પ્રપઞ્ચકમ્ ॥ ૧૪.૨૮॥

અસદેવાહમેવાસ્મિ અસદેવ ત્વમેવ હિ ।
અસદેવ મનોવૃત્તિરસદેવ ગુણાગુણૌ ॥ ૧૪.૨૯॥

અસદેવ મહી સર્વા અસદેવ જલં સદા ।
અસદેવ જગત્ખાનિ અસદેવ ચ તેજકમ્ ॥ ૧૪.૩૦॥

અસદેવ સદા વાયુરસદેવેદમિત્યપિ ।
અહઙ્કારમસદ્બુદ્ધિર્બ્રહ્મૈવ જગતાં ગણઃ ॥ ૧૪.૩૧॥

અસદેવ સદા ચિત્તમાત્મૈવેદં ન સંશયઃ ।
અસદેવાસુરાઃ સર્વે અસદેવેદશ્વરાકૃતિઃ ॥ ૧૪.૩૨॥

અસદેવ સદા વિશ્વં અસદેવ સદા હરિઃ ।
અસદેવ સદા બ્રહ્મા તત્સૃષ્ટિરસદેવ હિ ॥ ૧૪.૩૩॥

અસદેવ મહાદેવઃ અસદેવ ગણેશ્વરઃ ।
અસદેવ સદા ચોમા અસત્સ્કન્દો ગણેશ્વરાઃ ॥ ૧૪.૩૪॥

અસદેવ સદા જીવ અસદેવ હિ દેહકમ્ ।
અસદેવ સદા વેદા અસદ્દેહાન્તમેવ ચ ॥ ૧૪.૩૫॥

ધર્મશાસ્ત્રં પુરાણં ચ અસત્યે સત્યવિભ્રમઃ ।
અસદેવ હિ સર્વં ચ અસદેવ પરમ્પરા ॥ ૧૪.૩૬॥

અસદેવેદમાદ્યન્તમસદેવ મુનીશ્વરાઃ ।
અસદેવ સદા લોકા લોક્યા અપ્યસદેવ હિ ॥ ૧૪.૩૭॥

અસદેવ સુખં દુઃખં અસદેવ જયાજયૌ ।
અસદેવ પરં બન્ધમસન્મુક્તિરપિ ધ્રુવમ્ ॥ ૧૪.૩૮॥

અસદેવ મૃતિર્જન્મ અસદેવ જડાજડમ્ ।
અસદેવ જગત્સર્વમસદેવાત્મભાવના ॥ ૧૪.૩૯॥

અસદેવ ચ રૂપાણિ અસદેવ પદં શુભમ્ ।
અસદેવ સદા ચાહમસદેવ ત્વમેવ હિ ॥ ૧૪.૪૦॥

અસદેવ હિ સર્વત્ર અસદેવ ચલાચલમ્ ।
અસચ્ચ સકલં ભૂતમસત્યં સકલં ફલમ્ ॥ ૧૪.૪૧॥

અસત્યમખિલં વિશ્વમસત્યમખિલો ગુણઃ ।
અસત્યમખિલં શેષમસત્યમખિલં જગત્ (દ્વયમ્) ॥ ૧૪.૪૨॥

અસત્યમખિલં પાપં અસત્યં શ્રવણત્રયમ્ ।
અસત્યં ચ સજાતીયવિજાતીયમસત્સદા ॥ ૧૪.૪૩॥

અસત્યમધિકારાશ્ચ અનિત્યા વિષયાઃ સદા ।
અસદેવ હિ દેવાદ્યા અસદેવ પ્રયોજનમ્ ॥ ૧૪.૪૪॥

અસદેવ શમં નિત્યં અસદેવ શમોઽનિશમ્ ।
અસદેવ સસન્દેહં (ચ સન્દેહં) અસદ્યુદ્ધં સુરાસુરમ્ ॥ ૧૪.૪૫॥

અસદેવેશભાવં ચાસદેવોપાસ્યમેવ હિ ।
અસચ્ચ કાલદેશાદિ અસત્ક્ષેત્રાદિભાવનમ્ ॥ ૧૪.૪૬॥

તજ્જન્યધર્માધર્મૌ ચ અસદેવ વિનિર્ણયઃ ।
અસચ્ચ સર્વકર્માણિ અસદસ્વપરભ્રમઃ ॥ ૧૪.૪૭॥

અસચ્ચ ચિત્તસદ્ભાવ અસચ્ચ સ્થૂલદેહકમ્ ।
અસચ્ચ લિઙ્ગદેહં ચ સત્યં સત્યં શિવં શપે ॥ ૧૪.૪૮॥

અસત્યં સ્વર્ગનરકં અસત્યં તદ્ભવં સુખમ્ ।
અસચ્ચ ગ્રાહકં સર્વં અસત્યં ગ્રાહ્યરૂપકમ્ ॥ ૧૪.૪૯॥

અસત્યં સત્યવદ્ભાવં (સત્યવદ્ભાનં) અસત્યં તે શિવે શપે ।
અસત્યં વર્તમાનાખ્યં અસત્યં ભૂતરૂપકમ્ ॥ ૧૪.૫૦॥

અસત્યં હિ ભવિષ્યાખ્યં સત્યં સત્યં શિવે શપે ।
અસત્પૂર્વમસન્મધ્યમસદન્તમિદં જગત્ ॥ ૧૪.૫૧॥

અસદેવ સદા પ્રાયં અસદેવ ન સંશયઃ ।
અસદેવ સદા જ્ઞાનમજ્ઞાનજ્ઞેયમેવ ચ ॥ ૧૪.૫૨॥

અસત્યં સર્વદા વિશ્વમસત્યં સર્વદા જડમ્ ।
અસત્યં સર્વદા દૃશ્યં ભાતિ તૌ રઙ્ગશૃઙ્ગવત્ ॥ ૧૪.૫૩॥

અસત્યં સર્વદા ભાવઃ અસત્યં કોશસમ્ભવમ્ ।
અસત્યં સકલં મન્ત્રં સત્યં સત્યં ન સંશયઃ ॥ ૧૪.૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સર્વમસદેવત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૪ । ૨૮(૨)-૫૪॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 14 . 28(2)-54..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Sarvamasadevatvanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*